# काव्यत्रयी – प्रथम भाग

**डॉ. बलराम शुक्ल**
सहायक आचार्य (संस्कृत विभाग)
दिल्ली विश्वविद्यालय

**तव स्मृतिः**

**दिनान्यभद्राणि** तव स्मृतिं विना
नयामि नारायण! यानि तानि तु ।
अघावलीभिर्जनितानि भस्मताम्
अघावलीनां जनकानि यान्तु मे ॥

गणाः क्षणानां भवतः स्मृतिं विना
गता,न गच्छन्तु यमेन गण्यताम् ।
यतो हि सर्वं भवतोऽन्वयं विना
त्वजीवनिर्जीवनमेतदास्त मे ॥

तव स्मृतिर्वक्षसि चन्दनोक्षणं
दृशोः प्रदेशेऽमृतवर्तिकाऽञ्जनम् ।
तनौ बिसं, मामककर्णयोर्युगे
सरस्वतीहस्तविमृष्टवल्लकी ॥

तव स्मृतिः पौषसमा तपच्छुचौ
तुदद्दिनेशे दिवसे च कौमुदी ।
जगद्दवाग्नौ ज्वलिते समन्ततोऽ
प्यनन्तसौन्दर्यसुशोभिवाटिका ॥

तव स्मृतिश्चन्दनपल्लवास्तरः
सुरापगायां सुचिरं निमज्जनम् ।
सुसूक्ष्मरूपैर्हिमरश्मिरश्मिभिः
विनिर्मितं निर्वृतिदं च कञ्चुकम् ॥

यथा च यष्टिः प्रवयःकरेऽर्पिता
यथा शिशुः स्यात्पितुरङ्कनिर्वृतः ।
यथा सती स्वीयवरस्य वक्षसि
तव स्मृतौ मे मनसस्तथा गतिः ॥

यथारुणः पूर्वदिगङ्गनामुखं
यथा शशी रात्रितनूमनूनभाः ।
यथा प्रदीपस्सकलं निवेशनं
तथा स्मृतिस्ते हृदयं प्रकाशयेत् ॥

यथा च विद्युज्जलदान्धकारितं
जगत् स्फुरन्त्येकपदे प्रकाशयेत् ।
तथा प्ररूढाघमलीमसाधिके
तव स्मृतिर्मे मनसि प्रकाशताम् ॥

विहीनचन्द्रा रजनी जनिष्यते
दिनं दिनेशाद्रहितं भविष्यति ।
अमन्त्रपूताकृति सन्ध्ययोर्युगं
मनस्त्वदीयस्मृतिभिर्विनाकृतम् ॥